# shrIrAmasarvasvastotram

# શ્રીરામસર્વસ્વસ્તોત્રમ્

## Document Information

Text title : shrIrAmasarvasvastotram

File name : shrIrAmasarvasvastotram.itx

Category : kavacha, raama

Location : doc_raama

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : March 20, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીરામસર્વસ્વસ્તોત્રમ્

॥ અથ શ્રીરામસર્વસ્વસ્તોત્રમ્ ॥

રામો માતા મત્પિતારામચન્દ્રો ભ્રાતારામો મત્સખા રામચન્દ્રઃ ।
રામઃ સ્વામી રામ એવાર્થદાતા રામાદન્યં નૈવ જાને ન જાને ॥ ૧॥

રામઃ સેવ્યો વન્દનીયોઽપિ રામો રામોનિત્યં માદૃશૈશ્ચિતનીયઃ ।
રામો જ્ઞાનં ધ્યાનગમ્યોઽપિ રામો રામાદન્યં નૈવ જાને ન જાને ॥ ૨॥

રામો ભુક્તિર્મુક્તિદાતા ચ રામો રામોઽસ્માકં રાજતે રાજરાજઃ ।
લોકેઽસ્માભિર્લોક્યતે રામચન્દ્રો રામાદન્યં નૈવ જાને ન જાને ॥ ૩॥

રામોધર્મઃ કર્મરામો મદીયં રામોમહ્યં કર્મસિદ્ધિપ્રદાતા ।
રામોઽજસ્રઃ કર્મસિદ્ધિસ્વરૂપી રામાદન્યં નૈવ જાને ન જાને ॥ ૪॥

રામોઽસ્માભિઃ પૂજનીયોનિતાન્તં રામોઽસ્માભિઃ પ્રત્યહં કીર્તનીયઃ ।
રામોઽસ્માભિર્ગોપનીયો ગુહાન્તે રામદન્યં નૈવ જાને ન જાને ॥ ૫॥

રામોઽસ્માકં દુઃખહર્તા ત્રિલોક્યાં રામોઽસ્માકં કર્મકર્તા સદૈવ ।
રામોઽસ્માકં કર્મભૂતો વિભાતિ રામાદન્યં નૈવ જાને ન જાને ॥ ૬॥

રામોજ્ઞાતિઃ ખ્યાતિરપ્યેવ રામો રામઃ કીર્તિઃ પૂર્તિરપ્યેવ રામઃ ।
સર્વસ્વં મે રામચન્દ્રોઽવનીન્દ્રો રામાદન્યં નૈવ જાને ન જાને ॥ ૭॥

ગ્રામેરણ્યે જાગરે સ્વપ્નકાલે માર્ગે દુર્ગે ગચ્છતોઽગચ્છતો મે ।
શશ્વલ્લોકે રક્ષકસ્ત્વેવ રામો રામાદન્યં નૈવ જાને ન જાને ॥ ૮॥

યે વૈ ત્રિસન્ધ્યં પ્રપઠન્તિ નિત્યં શ્રીરામસર્વસ્વમનન્ય ભક્ત્યા ।
શ્રીરામરામેણ કૃતં કૃતાર્થાસ્તેઽપ્યચ્યુતં રામપદં પ્રયાન્તિ ॥ ૯॥

ઇતિ શ્રીરામસર્વસ્વસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*shrIrAmasarvasvastotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*